स्पृष्टमेव च। पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः। वपनं मेखलादण्डो भैक्ष्यचर्य्याव्रतानि च। निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि” मनुः। “विड्वराहादीनां बह्वमात्यत्वात् मनुष्यसम्बन्धि मूत्रं पुरीषं वा अबुद्धिपूर्वकं प्राश्य सुरासंसृष्टञ्च भक्तादिरसं वा प्राश्य द्विजातयस्त्रयोवर्णाः पुनरुपनयनमर्हन्ति। वपनमिति “शिरोमुण्डनं मेखलाधारणं दण्डधारणं भैक्षाणि च मधुमांसस्त्रीवर्जनयुतानि प्रायश्चित्तार्थं पुनरुपनयने द्विजातीनां न भवन्ति” कुल्लू०।

**पुनः(न)स्तोम** पु०वा विसर्गलोपः। उक्थ्यसंस्थे यज्ञभेदे “बहुप्रतिग्रहा गरगीरिव योमन्येत तस्य पुनःस्तोम उक्थ्यः” कात्या०२२।६।१६ “बहुप्रतिग्रहा गरम्भक्षीतमिवात्मानं यो मन्यते तस्य पुनःस्तोमसंज्ञक उक्थ्यसंस्थो भवति” कर्कः।

**पुनर्** अव्य० पन–स्तुतौ बा० अरि पृषो०। १द्वितीयवारे अप्रथमे२ भेदे च अमरः। ४अधिकारे ५पक्षान्तरे मेदि० “पुनरप्रथमे ६विशेषे च” गणर० उक्ते विशेषे च पुनरिति भूयोऽर्थविशेषयोः” गणरत्नटीका।

**पुनरसु** पु० पुनरसुर्जीवनं यस्मात्सोऽस्य। पुनर्जाते शत०ब्रा०१। ५।३।१४।

**पुनरागत** त्रि० पुनर्वारमागतः। प्रत्यागते मनुः ११।१८६।

**पुनरागमन** न० पुनर्वारमागमनम्। प्रत्यागमने

**पुनराधान** न० पुनर्वारमाधानम्। श्रौतस्मार्त्ताग्नेर्द्वितीयाधाने “पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च” मनुः ५।१५८। “अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः। न तावत् पुनराधानमन्यारण्योर्विधीयते” कर्मप्रदीपः। “नाशजयदाहादिनिमित्तेऽन्ययोः परिग्रहोपदेशाच्च” कात्या०श्रौ०४।७।२२ “अरण्योर्द्वयोर्वापि नष्टयोः क्षीणयोस्तथा। आहृत्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत्” इति “अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहृतः। पालयेदुपशान्तेऽस्मिन् पुनराधानमिष्यते” कर्मप्रदीपः।

**पुनराधेय** न० पुनर्वारमाधेयमग्न्याधानम्। श्रौते कर्मभेदे तच्च “पुनराधेय आधानप्रतिज्ञानस्य” कात्या०श्रौ०४।११।१स्त्रत्वादौ तद्ब्राह्मणे च पद्धतौ दृश्यम्।

**पुनरावर्त्तिन्** त्रि० पुनःपुनर्वारमावर्त्तते आ+वृत–णिनि। भूयो भूय आगन्तरि “आ ब्रह्मभुवनात् लोकाः पुनरावर्त्तिनोऽर्जुन!” गीता।

**पुनराहार** पु० पुनर्वारमाहारो भोजनं प्रा०त०। द्वितीयवारभोजने भूयस्तत्तद्दर्थाहरणे च कात्या०श्रौ०२५।११।१०

**पुनरुक्त** त्रि० पुनर्वारमुक्तम्। पुनर्वारं कथिते १अर्थे २शब्दे च। तत्र शब्दस्य पुनरुक्तत्वे तदर्थस्यापि पुनरुक्तत्वं नियतम् ततः उक्था० तद्वेत्त्यर्थे ठक् पौनरुक्तिक तद्वेत्तरि त्रि०। शब्दपरत्वे ऋगयनादित्वात् अण्। पौनरुक्त तच्छब्दाध्येतरि त्रि०। भावे क्त। ३पुनःकथने न०

**पुनरुक्तजन्मन्** पु० पुनरुक्तं द्वितीयवारं जन्म यस्य। १द्विजातौ २ब्राह्मणे त्रिका० “द्वितीयं मौञ्जीबन्धने” मनूक्तेस्तस्य तथात्वम्। [दृश्यम्।

**पुनरुक्तवदाभास** पु० अलङ्कारभेदे अलङ्कारशब्दे ३८८ पृ०

**पुनरुत्पत्ति** स्त्री उत्पन्नस्य पुनरुत्पत्तिः। असत्ये उत्पन्नस्य पुनरुत्पादे स च न सम्भवति उत्पन्नस्य पुनरुत्पादासम्भवात् इति सिद्धान्तः।

**पुनरुत्सृष्ट** पु० पशुभेदे। पूर्वं वाहितः दौर्बल्यात् स उत्सृष्टः पुनरपि सबलो जातः पुनरपि वाहितः पुनश्च दौर्बल्याद्वा उत्सृष्टस्तादृशे पशौ” कात्या०७।११।५ सूत्रभाष्यम्। [तु कौन्तेय! पुनर्जन्म न विद्यते” गीता

**पुनर्जन्मन्** न० पुनर्भूयोजन्म। भूयोजन्मनि “मामुपेत्य

**पुनर्ण(न)व** पु० पुनरपि नवः “पूर्वपदात् संज्ञायामगः” पा० संज्ञायां णत्वम् अन्यत्र न णत्वम्। १नखे हेमच० तस्य छिन्नरूढत्वात्तथात्वम्। २भूयोनवे त्रि० अणत्वम्।

**पुनर्नवा** स्त्री पुनर्नवा पुनर्नूयते नू–कप् वा कुष्माण्डादेराकृतिगणत्वात् न णत्वम्। शोथघ्न्यां (पुनपुना) शाकभेदे अमरः। सा च द्विविधा श्वेता रक्ता च तयोर्गुणादि भावप्र० उक्तं यथा

“पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका। कटुः कषायाऽनुरूष्णा पाण्डुघ्नी दीपनी परा। शोफानिलगरश्लेष्महरी ब्रध्नोदरप्रणुत्। पुनर्नवाऽपरा रक्ता रक्तपुष्पा शिलाटिका। शोथघ्नी क्षुद्रवर्षाभूर्वर्षकेतुः कठिल्लकः। पुनर्नवाऽरुणा तिक्ता कटुपाका हिमा लघुः। वातलग्राहिणी श्लेष्मपित्तरक्तविनाशिनी”।

**पुनर्नवामण्डूर** न० चक्रपाणिदत्तोक्ते औषधभेदे

“पुनर्नवात्रिवृच्छुण्ठीपिप्पलीमरिचानि च। विडङ्गं देवकाष्ठञ्च चित्रकं पुष्कराह्वयम्। त्रिफलां द्वे हरिद्रे च दन्तीञ्च चविकन्तथा। कुटजस्य फलं तिक्तां पिप्पली मूलमुस्तकम्। एतानि समभागानि मण्डूरं द्विगुणं ततः। गोमूत्रेऽष्टगुणे पक्त्वा स्थापयेत् स्निग्धभाजने। पाण्डुशोथोदरानाहशूलार्शःक्रिमिगुल्मनुत्”।

**पुनर्भव** पु० छिन्नोऽपि पुनर्भवति भू–अच्। १नखे अमरः